# Shivagirija Stuti by Brihadbala

# બૃહદ્બલકૃતા શિવગિરિજાસ્તુતિઃ

## Document Information

Text title : Shivagirija Stuti by Brihadbala

File name : shivagirijAstutiHbRRihadbalakRRitA.itx

Category : shiva, shivarahasya, stuti, pArvatI

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 17| 17-23, 25-27||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

Shivagirija Stuti by Brihadbala

# બૃહદ્બલકૃતા શિવગિરિજાસ્તુતિઃ

સુરેશ્વરં નિરીશ્વરં ગિરીશ્વરં નટેશ્વરં
મહેશ્વરં મયસ્કરં શિવં ભજેય શઙ્કરમ્ ।
ભુજઙ્ગરાજહારકં સુમારમારહારકં
મહાવિષાગ્નિધારકં ભજે વિમુક્તિદાયકમ્ ॥ ૧॥

સુરારિવૃન્દદુઃખદં શુભાઙ્ગદં શુભાસ્પદં
સુબદ્ધકર્મમોક્ષદં ભજે શિવં વિમુક્તિદમ્ ।
વિધીન્દ્રવિષ્ણુસન્મુખં મહાગિરીન્દ્રજાસખં
ધનેશમુખ્યસત્સખં ભજે શિવં મદુન્મુખમ્ ॥ ૨॥

ઉમાપતિં સભાપતિં દિશામ્પતિં પશોર્પતિં
ગિરામ્પતિં પતેર્પતિં ભજે શિવં દિવસ્પતિમ્ ॥ ૩॥

દન્વિત્વક્પરિધાન શઙ્કર મહાદેવેશ મા મા જહિ
વિભ્રન્મેરુશરાસનં હરિશરો હસ્તેન જિઘ્રન્ શિરઃ ।
તૂર્ણં તર્ણકમેત્ય પ્રસ્નુતપયઃ પૂરા યથા ગૌર્ભવેત્
તદ્વત્ત્વં ગિરિજામનોહર વિભો હૃત્પદ્મસંસ્થો મમ ॥ ૪॥

ત્વત્પાદભ્રમરસ્ય ભક્તિસુરસામોદાપ્તયે કેવલમ્ ॥ ૫॥

વિષ્ણુવેદે ચ ગીતસ્ત્વમસિ ભગવન્ શઙ્કર વિભો
સુધન્વા ચાપિ ત્વં ત્વમસિ ભવ વિશ્વાધિક ભિષક્ ।
તમીશાનં યક્ષ્યે નિખિલસુમનસ્ત્વાય ચ હરં
નમામિ ત્વત્પાદં શરણદ શિવં સ્તૌમિ વચસા ॥ ૬॥

ઉન્મત્તકુમ્ભિકરસન્નિભકણ્ઠસંસ્થ
(ઉન્મત્તકુમ્ભિકરસન્નિભોકુરુ)
કુમ્ભીનસોલ્લસવિલોલસુભૂરિહારમ્ ।
(કુમ્ભીનસોલ્લાસવિલોલહારમ્)

કુમ્ભીન્દ્રવક્ત્રોજ્જ્વલપુત્રવર્યં
ભજામિ કુમ્ભોદ્ભવપૂજિતાઙ્ઘ્રિમ્ ॥ ૭॥

વિદ્રુમાધરનિરાકૃતબિમ્બાં વક્ત્રનિર્જિતસુધાકરબિમ્બામ્ ।
ઈશ્વરીમનિશમાત્તકદમ્બાં મન્મનઃ સ્પૃશતુ તાં જગદમ્બામ્ ॥ ૮॥

પાદયોરવનતામરદારાન્ ભક્તલોકકલુષાદ્વિદારાન્ ।
ભાવુકસ્ય હૃદયાધિવિહારાન્મન્મનો ભજ જગત્પતિદારાન્ ॥ ૯॥

પાપરાશિષુ શિખાં ભૃશમૌર્વીં વિભ્રતીમધિકચં સ્મરમૌર્વીમ્ ।
નેત્રપદ્મજધનેષુ સુગુર્વીં મન્મનઃ સ્પૃશતુ તાં હૃદિ ગુર્વીમ્ ॥ ૧૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બૃહદ્બલકૃતા શિવગિરિજાસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૧૭। ૧૭-૨૩, ૨૫-૨૭॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 17. 17-23, 25-27..

Notes:

King Brhadbala eulogizes Shiva and Girija.

The shlokas have been renumbered for readers' convenience.

Proofread by Ruma Dewan

*Shivagirija Stuti by Brihadbala*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*